শ্ৰীঃ
শ্ৰীমতে নিগমান্তমহাদেশিকায নমঃ
শ্ৰীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্ৰী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্ৰীমন্নারাযণীযম্॥

## দশক - ৩৮

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্ৰী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥ শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৩৮

*কৃষ্ণাৱতারৱৰ্ণনম্*

আনন্দরূপ ভগৱন্নযি তেৱতারে
  প্ৰাপ্তে প্ৰদীপ্তভৱদঙগনিরীযমাণৈঃ।
কান্তিৱ্ৰজৈরিৱ ঘনাঘনমণ্ডলৈৰ্দ্যা-
  মাৱৃণৱতী ৱিরুরুচে কিল ৱৰ্ষৱেলা॥ ১॥

আশাসু শীতলতরাসু পযোদতোযৈ-
  রাশাসিতাপ্তিৱিৱশেষু চ সজ্জনেষু।
নৈশাকরোদযৱিধৌ নিশি মধ্যমাযাং
  ক্লেশাপহস্ত্ৰিজগতাং ত্বমিহাৱিরাসীঃ॥ ২॥

বাল্যস্পৃশাপি ৱপুষা দধুষা ৱিভূতীঃ
  উদ্যতকিরীটকটকাঙগদহারভাসা।
শঙখারিৱারিজগদাপরিভাসিতেন
  মেঘাসিতেন পরিলেসিথ সূতিগেহে॥ ৩॥

ৱক্ষস্থলীসুখনিলীনৱিলাসিলক্ষ্মী-
  মন্দাক্ষলক্ষিতকটাক্ষৱিমোক্ষভেদৈঃ।
তন্মন্দিরস্য খলকংসকৃতামলক্ষ্মী-
  মুন্মাৰ্জযন্নিৱ ৱিরেজিথ ৱাসুদেৱ॥ ৪॥

শৌরিস্তু ধীরমুনিমণ্ডলচেতসোপি
  দূরস্থিতং ৱপুরুদীক্ষ্য নিজেক্ষণাভ্যাম্।
আনন্দবাষ্পপুলকোদগমগদগদাৰ্দ্ৰ-
  স্তুষ্টাৱ দৃষ্টিমকরন্দরসং ভৱন্তম্॥ ৫॥

দেৱ প্ৰসীদ পরপূরুষ তাপৱল্লি-
নির্লূনদাত্ৰ সমনেত্ৰ কলাৱিলাসিন্।
খেদানপাকুরু কৃপাগুরুভিঃ কটাক্ষৈ-
রিত্যাদি তেন মুদিতেন চিরং নুতোভূঃ॥ ৬ ॥

মাত্ৰা চ নেত্ৰসলিলাস্তৃতগাত্ৰৱল্যা
স্তোত্ৰৈরভিষ্টুতগুণঃ করুণালযস্ত্ৱম্।
প্ৰাচীনজন্মযুগলং প্ৰতিবোধ্য তাভ্যাং
মাতুর্গিরা দধিথ মানুষবালৱেষম্॥ ৭ ॥

ত্ৱতপ্ৰেরিতস্তদনু নন্দতনূজযা তে
ৱ্যত্যাসমারচযিতুং স হি শূরসূনুঃ।
ত্ৱাং হস্তযোরধৃত চিত্তৱিধার্যমার্যৈ-
রম্ভোরুহস্থকলহংসকিশোররম্যম্॥ ৮ ॥

জাতা তদা পশুপসদ্মনি যোগনিদ্ৰা
নিদ্ৰাৱিমুদ্ৰিতমথাকৃত পৌরলোকম্।
ত্ৱতপ্ৰেরণাত্ কিমিৱ চিত্ৰমচেতনৈর্যদ-
দ্বারৈঃ স্ৱযং ৱ্যঘটি সঙ্ঘটিতৈঃ সুগাঢম্॥ ৯ ॥

শেষেণ ভূরিফণৱারিতৱারিণাথ
স্ৱৈরং প্ৰদর্শিতপথো মণিদীপিতেন।
ত্ৱাং ধারযন্ স খলু ধন্যতমঃ প্ৰতস্থে
সোযং ত্ৱমীশ মম নাশয রোগৱেগান্॥ ১০ ॥

**********